# ३. बहुव्रीहिः। अनेकमन्यपदार्थे। (अन्यपदप्रधानः)

बहुव्रीहिसमासस्य द्वौ प्रकारौ –

३.१. समानाधिकरणबहुव्रीहिः।

३.२. व्याधिकरणबहुव्रीहिः।

अधिकरणस्यार्थः विभक्तिः।

अतः समानम् अधिकरण यस्य सः समानाधिकरणः।

तथा च विविधम् अधिकरणं यस्य सः व्यधिकरणः।

## ३.१. समानाधिकरणबहुव्रीहिः।

— पूर्वोत्तरपदयोः प्रथमा विभक्तिः भवति।

— अत्र अन्यपदं प्रधानं भवति इति अन्यपदप्रधानः समासः।

— अन्यपदप्रधानत्वात् अन्यपदस्य लिङ्गवचनविभक्तयः समस्तपदस्य स्युः।

— समस्तपदं प्रायशः विशेषणरूपं भवति।

— एकां प्रथमां वर्जयित्वा सर्वेषु विभक्त्यर्थेषु भवति।

यथा —

| | | | |
|---|---|---|---|
| द्वि. | गतं जलं यां सा | = | गतजला नगरी। |
| तृ. | पीतं जलं येन सः | = | पीतजलः बालकः। |
| च. | दत्तं जलं यस्मै सः | = | दत्तजलः बालकः। |
| प. | निर्गतं जलं यस्मात् सः | = | निर्गतजलः तडागः। |
| ष. | मधुरं जलं यस्याः सा | = | मधुरजला नदी। |
| स. | उष्णं जलं यस्मिन् सः | = | उष्णजलः कूपः। |

| पूर्वपदम् | उत्तरपदम् | यत् | तत् |
| --- | --- | --- | --- |
| + | + | + | + |
| प्रथमा विभक्तिः | प्रथमा विभक्तिः | सम्बन्धदर्शिनी विभक्तिः | अन्यपदस्य विभक्तिः |

उदा. — नीलकण्ठः भगवान् शङ्करः।

नीलः कण्ठः यस्य सः = नीलकण्ठः।

— विशालसेनः राजा युद्धं करोति।

विशाला सेना यस्य सः = विशालसेनः।

— भारतीयाः क्रिकेट्पटवः नीलवस्त्राः सन्ति।

नीलानि वस्त्राणि येषां ते = नीलवस्त्राः।

— परन्तु भारतीयसैनिकाः तु चित्रवसनाः सन्ति।

चित्राणि वसनानि येषां ते = चित्रवसनाः।

इदम् अवधेयम् –

– विग्रहकार्ये पूर्वोत्तरपदयोः स्वस्य एव लिङ्गं स्यात्।

पीतम् अम्बरं यस्य सः = पीताम्बरः कृष्णः।

– तयोः यत् च उचितं वचनं भवितुम् अर्हति तत् एव स्यात्।

मधुराणि फलानि यस्य सः= मधुरफलः वृक्षः।

– पूर्वपदं बहुशः उत्तरपदस्य विशेषणम् अस्ति इति पूर्वपदं तद्रूपं स्यात्।

पीतम् अम्बरं। मधुराणि फलानि। विशाला सेना।

– अन्योत्तरपदयोः कारकार्थं दृष्ट्वा यत् शब्दस्य रूपं स्यात्।

| | |
|---|---|
| प्राप्तं धनं यं सः प्राप्तधनः धनिकः | Object |
| धृतः सर्पः येन सः धृतसर्पः शिवः | Instrument |
| उपहृतं फलं यस्मै सः उपहृतफलः बालकः | Receiver |
| निर्गतं भयं यस्मात् सः निर्गतभयः सैनिकः | Separation |
| लम्बम् उदरं यस्य सः लम्बोदरः गणेशः | Relation |
| आरूढाः वानराः यस्मिन् सः आरूढवानरः वृक्षः | Location |

– अन्यपदार्थ इव तच्छब्दस्य समस्तपदस्य च रूपं भवति।

कृष्णं रूपं यस्य सः कृष्णरूपः मेघः।

कृष्णं रूपं यस्याः सा कृष्णारूपा बालिका।

कृष्णः वर्णः यस्य तत् कृष्णवर्णं पत्रम्।

– अन्योत्तरपदयोः सम्बन्धकारकेण यच्छब्दस्य षष्ठी विभक्तिः भवति।

महान् आत्मा यस्य सः महात्मा गान्धी।

महती काया यस्य सः महाकायः गणेशः।

पीतं वस्त्रं यस्य सः पीतवस्त्रः कृष्णः।

श्वेतपद्मम् आसनं यस्याः सा श्वेतपद्मासना सरस्वती।

भीमः पराक्रमः यस्य सः भीमपराक्रमः योद्धा।

शुभ्राः केशाः यस्याः सा शुभ्रकेशा वृद्धा।

गलिताः केशाः यस्य सः गलितकेशः वृद्धः।

— पूर्वपदं क्तप्रत्ययान्तं धातुरूपमस्ति चेत् प्रायशः करणेन तृतीया स्यात्।

पीतं जलं येन सः पीतजलः बालकः।

पीतम् अमृतं यैः ते पीतामृताः देवाः।

पराजिताः शत्रवः येन सः पराजितशत्रुः राजा।

लिखितं पाठं यैः ते लिखितपाठाः छात्राः।

जितानि इन्द्रियाणि येन सः जितेन्द्रियः आञ्जनेयः। (हनुमान्)

— कदाचित् अन्याः अपि विभक्तयः भवन्ति। (प्रथमापवादः)

गलिताः केशाः यस्मात् तत् गलितकेशं शिरः। *क्तप्रत्ययः सन् अपि पञ्चमी*

कृष्णाः केशाः यस्मिन् तत् कृष्णकेशं शिरः।

सत्यं प्रियं यस्मै सः सत्यप्रियः युधिष्ठिरः।

विमलम् उदकं यस्यां सा विमलोदका नदी।

वीराः पुरुषाः यस्मिन् सः वीरपुरुषकः ग्रामः।

— अन्यपदस्य यत् लिङ्गं भवेत् तस्मिन् एव लिङ्गे समस्तपदं स्यात्।

— पुंलिङ्गं सत् अपि स्त्रीलिङ्गि समस्तपदम्।

रक्तवर्णा बालिका। कोमलहस्ता स्त्री:।

— नपुंसकलिङ्गं सत् अपि स्त्रीलिङ्गि समस्तपदम्।

कृष्णनेत्रा बालिका। रक्तानना लक्ष्मी:। ... आननम् = मुखम्।

— स्त्रीलिङ्गं सदपि पुंलिङ्गि समस्तपदम्।

कृष्णकाय: श्रीराम:। विशालसेन: राजा।

— नपुंसकलिङ्गं सदपि पुंलिङ्गि समस्तपदम्।

विशालनेत्र: रुद्र:। प्रियमित्र: जन:। ... प्रियाणि मित्राणि यस्मै स:।

— पुंलिङ्गं सदपि नपुंसिकलिङ्गि समस्तपदम्।

रक्तवर्णं लोकयानम्। उत्तमस्वभावं मित्रम्।

— स्त्रीलिङ्गं सदपि नपुंसिकलिङ्गि समस्तपदम्।

घोराकृति यन्त्रम्। बहुशालं नगरम्। ... बहव: शाला: यस्मिन् तत्।

## ३.१. व्यधिकरणबहुव्रीहिः।

उदाहरणानि –

– केशेषु केशेषु गृहीत्वा इदं युद्धं प्रचलति।

= केशाकेशि।

– दण्डैः च दण्डैः च प्रहृत्य इदं युद्धं प्रचलति।

= दण्डादण्डि।

– हस्ताभ्यां च हस्ताभ्यां च श्रमित्वा इदं कार्यं प्रचलति।

= हस्ताहस्ति।

– पश्चिमायाः उत्तरस्याः च अन्तरालम् इति वायवी दिशा।

= पश्चिमोत्तरा।

– पुत्रेण सह आगतः पिता।

= सपुत्रः।

चिन्ता मास्तु ।

व्यधिकरणबहुव्रीहिः समासः

पाठ्यक्रमे निर्दिष्टः नास्ति ।

☺